# Shri Sadguru Jnaneshvarastotram

# શ્રીસદ્ગુરુજ્ઞાનેશ્વરસ્તોત્રમ્

## Document Information

Text title : Jnaneshvara Stotram

File name : jnAneshvarastotram.itx

Category : deities_misc, gurudev, varadAnanda

Location : doc_deities_misc

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : May 19, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 19, 2023

*sanskritdocuments.org*

# શ્રીસદ્ગુરુજ્ઞાનેશ્વરસ્તોત્રમ્

ૐ શ્રી ।
શ્રીશઙ્કર ।
શ્રીસદ્ગુરુજ્ઞાનેશ્વરસ્તોત્રમ્ ।
ૐ નમો ભગવતે શ્રીજ્ઞાનદેવાય ।

સદ્ગુરું સચ્ચિદાનન્દં કેવલં કરુણાકરમ્ ।
જ્ઞાનયોગેશ્વરં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧॥

વાઙ્મનોબુદ્ધિભાવાનામતીતં પરમેશ્વરમ્ ।
નિષ્કલં સગુણં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૨॥

નિર્મલં સદયં શાન્તં પ્રણતાખિલમઙ્ગલમ્ ।
જ્ઞાનૈકરૂપિણં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૩॥

ભક્તિકલ્પતરોર્મૂલં બીજં સાધનસમ્પદઃ ।
સર્વલોકહિતં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૪॥

આવિર્ભૂતો હરિઃ સાક્ષાત્ પાવને ગૌતમીતટે ।
રૂપેણ યસ્ય તં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૫॥

નિવૃત્તિમાર્ગિણો મુક્તિઃ સોપાનસુલભાકૃતા ।
કૃપયા યસ્ય તં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૬॥

જ્ઞાનં ભક્તિરસં યસ્ય યદ્ભક્તિર્જ્ઞાનભાસ્વતી ।
તમદ્વૈતપરં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૭॥

દૃષ્ટિઃ કૃપાવતી યસ્ય નિત્યં પીયૂષવર્ષિણી ।
નતાશ્રયાઙ્ઘ્રિં તં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૮॥

સુધાવિજયિની તાપશમની લોકપાવની ।
ભારતી યસ્ય તં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૯॥

ભાવાર્થદીપિકા યસ્યાઽનુભવામૃતજીવની ।
તં બુદ્ધિભાસ્કરં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧૦॥

શરદિન્દુમનોજ્ઞાઙ્ગં કમલાયતલોચનમ્ ।
પદ્માસનસ્થિતં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧૧॥

પ્રસન્નં પરમોદારં વરદં સુસ્મિતાનનમ્ ।
આલન્દિવલ્લભં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧૨॥

સુહૃદં સર્વભૂતાનાં માતરં પિતરં પ્રભુમ્ ।
પ્રેમલં વત્સલં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧૩॥

બુદ્ધિનદ્યાઃ શરત્કાલં પ્રગ્રહં ચિત્તવાજિનઃ ।
પાપતાપહરં વન્દે જ્ઞાનદેવં પુનઃ પુનઃ ॥ ૧૪॥

હે તાત ભવતૈવોક્તં શિશોર્માતા સ્વયં હિતા ।
ચિત્તવૃત્તેઃ સમાધાનં બુદ્ધેઃ સ્થૈર્યં સદાઽસ્તુ મે ॥ ૧૫॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીસદ્ગુરુજ્ઞાનેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।
જ્ઞાનેશ્વરસ્તોત્રં
ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri Sadguru Jnaneshvarastotram*
pdf was typeset on May 19, 2023

Please send corrections to *sanskrit@cheerful.com*